शकुनीश्वरः, पुं, (शकुनीनां पक्षिणामीश्वरः ।) गरुड़ः । इति धनञ्जयः ॥

शकुन्तः, पुं, (शक्नोति उत्पतितुमिति । शक + "शकेरुनोन्तोन्त्युनयः ।" उणा० ३।४९ । इति उन्तः ।) पक्षी । इत्यमरः ॥ (यथा, महाभारते । १ । ७२ । ११ ।

"नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः ।
पर्य्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् ॥")

कीटभेदः । भासपक्षी । इति मेदिनी ॥

शकुन्तला, स्त्री (शकुन्तैः पक्षिभिर्लायते पाल्यते इति । ला + घञर्थे कः । स्त्रियामाप् ।) मेनकाप्सरःसु विश्वामित्रेण जनिता कन्या । सा कण्वमुनिना प्रतिपालिता । दुष्मन्तराजेन विवाहिता । अस्याः पुत्रो भरतः राजचक्रवर्त्ती । अस्या नामकारणं यथा,—

"निर्जने तु वने यस्मात् शकुन्तैः परिरक्षिता ।
शकुन्तलेति नामास्याः कृतञ्चापि ततोमया ॥"
इति महाभारते ।१।७२।१५॥

अस्या विवरणं कालिदासकृताभिज्ञानशकुन्तलनाटके द्रष्टव्यम् । पाद्मे स्वर्गखण्डे प्रथमादिपञ्चाध्यायेषु महाभारते आदिपर्व्वणि ६९ अध्यायमारभ्य च ज्ञातव्यम् ॥

शकुन्तलात्मजः, पुं, (शकुन्तलाया आत्मजः पुत्रः ।) भरतराजः । यथा,—

"दौष्मन्तिर्भरतः सर्व्वदमः शकुन्तलात्मजः ॥"
इति हेमचन्द्रः ॥

शकुन्तिः, पुं, (शक्नोति उत्पतितुमिति । शक + उन्तिः ।) पक्षिमात्रम् । इत्यमरः ॥ (यथा, ऋग्वेदे । २ । ४२ । ३ ।

"अवक्रन्द दक्षिणतो गृहाणां
सुमङ्गलो भद्रवादी शकुन्ते ! ॥")

भासपक्षी । इत्युणादिकोषः ॥

शकुलः, पुं, (शक्नोति गन्तुं वेगेनेति । शक + "मद्गुरादयश्च ।" उणा० १ । ४२ । इति उरच् । रस्य लः ।) मत्स्यविशेषः । इत्यमरः ॥ शउल इति भाषा ॥ (यथा, महाभारते ।१२ । १३७ । ३ ।

"नातिगाधे जलाधारे सुहृदः शकुलास्त्रयः ।
प्रभूतमत्स्ये कौन्तेय! बभूवुः सहचारिणः ॥")

अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । ग्राहित्वम् । पित्तामजित्त्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

शकुलगण्डः, पुं, (शकुलस्य गण्ड इव गण्डो यस्य ।) शालमत्स्यः । इति त्रिकाण्डशेषः ॥

शकुलाक्षकः, पुं, श्वेतदूर्व्वा । इत्यमरः ॥

शकुलाक्षी, स्त्री, गण्डदूर्व्वा । इति राजनिर्घण्टः ।

शकुलादनी, स्त्री, (शकुलानां अदनं यस्याः । ङीप् ।) चक्राङ्गी । इत्यमरः ॥ कट्की इति । भाषा । कञ्चटशाकः । इति मेदिनी । कांचड़ा दाम इति भाषा ॥ मांसी । किञ्चुलिका । जलपिप्पली । कट्फलः । इति विश्वः । गजोपषा । इति राजनिर्घण्टः ॥

शकुलार्भकः, पुं, (शकुलस्य अर्भक इव ।) गड़कमत्स्यः । इत्यमरः ॥ (गड़इमाछ इति भाषा ॥)

शकुली, स्त्री, (शकुल + ङीष् ।) मत्स्यविशेषः । सृगाल् इति भाषा । महाशकुल इति केचित् । अस्या आकारो गुणाश्च ।

"शकुली रोहिताकारा भूमौ प्रायश्चरत्यसौ ।
गुर्व्वी पाके च मधुरा भेदिका दोषकोपना ॥"
इति राजवल्लभः ॥

पुस्तकान्तरे शकली इति च पाठः ॥ (नदीविशेषः । यथा, मार्कण्डेये । ५७ । २३ ।

"सुमेरुजा शुक्तिमती शकुली त्रिदिवा क्रमुः ।
स्कन्धपादप्रसूता वै तामान्या वेगवाहिनी ॥")

शकृत्, क्ली, (शक्नोति सर्त्तुमिति । शक् + "शकेर्ऋतिन् ।" उणा० ४ । ५८ । इति ऋतिन् ।) विष्ठा । इत्यमरः ॥ यथा, (भागवते । ३।३०।१९।

"स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्चति ॥")

शकृत्करिः, पुं, स्त्री, (शकृत् करोतीति । शकृत् + कृ + "स्तम्बशकृतोरिन् ।" ३।२।२४ । इति इन् ।) वत्सः । इत्यमरः ॥ दन्त्यादिरिति विद्याविनोदः ॥

शकृत्कारः, त्रि, मलत्यागकारकः । शकृत् करोतीत्यर्थे शकृच्छब्दात् कृधातोः घञ् (अण्) प्रत्ययेन निष्पन्नः ॥

शकृद्द्वारं, क्ली, (शकृतो द्वारम् ।) मलद्वारम् । तत्पर्य्यायः । अपानम् २ पायुः ३ गुदम् ४ च्युतिः ५ अधोमर्म्म ६ त्रिवलीकः ७ वली ८ । इति हेमचन्द्रः ॥

शक्करः, पुं, वृषः । इति हेमचन्द्रः ॥

शक्करिः, पुं, वृषः । इति त्रिकाण्डशेषः ॥

शक्करी, स्त्री, छन्दोभेदः । नदीभेदः । मेखला । इति मेदिनी ॥ सा च समवृत्तषड्विंशतिच्छन्दोऽन्तर्गतचतुर्द्दशच्छन्दः । यथा,—

"उक्त्यात्युक्त्या तथा मध्या प्रतिष्ठान्या
सुपूर्व्विका ।
गायत्र्युष्णिगनुष्टुप् च वृहती पङ्क्तिरेव च ॥
त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्करी सातिपूर्व्वा स्यादष्ट्यत्यष्टी तथा मता ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः संकृतिश्चापि तथा चैवातिसत्कृतिः ॥
इत्याख्याः समवृत्तानां छन्दसां क्रमशः कृताः ॥"

तत्र चतुर्दशाक्षरपादसप्तच्छन्दांसि सन्ति । तेषां नामानि गणाश्च यथा ।

म्तौ गौ गो नौ मः शरनवभिरसंबाधा । १ ।
श्रेयं वसन्ततिलकं तभजा जगौ गः । २ ।
ननरसलयुगैः स्वरैरपराजिता । ३ ।
ननभनलगितिप्रहरणकलिका । ४ ।
मस्तौ नो मो गौ यदि गदिता वासन्तीयम् ।५।
द्विः सप्त च्छिदि लोलाम्सौ म्भौ गौ चरणे चेत् ।६।
स्वरभिदि यदि नौ तौ च नान्दीमुखीयम् ।७।
इति छन्दोमञ्जरी ॥

एतेषामुदाहरणानि बाहुल्यभिया नोक्तानि ॥

शक्तः, त्रि, (शक + क्तः ।) शक्तिविशिष्टः । समर्थः । तत्पर्य्यायः । सहः २ क्षमः ३ प्रभुः ४ उष्णुः ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ९ । २०७ ।

"भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा ।
न निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वोपजीवनम् ॥")

प्रियंवदः । इति शक्तशब्दटीकायां स्वामी ॥

शक्तवः, पुं, भूम्नि, भ्रष्टयवादिचूर्णम् । छातु इति भाषा । यथा,—

"धाना भ्रष्टयवे भूम्नि स्त्रियां पुंभूम्नि शक्तवः
केचित्तु शक्तुरस्त्रीति वन्धुरा भूर्मानि स्त्रियाम् ॥"
इति जटाधरः ॥

अस्य विवरणं शक्तुशब्दे द्रष्टव्यम् ॥

शक्तिः, स्त्री, (शक + क्तिन् ।) कार्य्यजननसामर्थ्यम् । यथा,—

"या देवी सर्व्वभूतेषु शक्तिरूपेण संस्थिता ।"
इति देवीमाहात्म्यस्य टीकायां नागोजीभट्टः ॥

शक्यते जेतुमनया । सा प्रभावोत्साहमन्त्रजभेदात्त्रिविधा । तत्र प्रभुत्वे साधकत्वात् कोषदण्डौ प्रभुशक्तिः १ । विक्रमेण स्वशक्त्या विस्फुरणमुत्साहशक्तिः २ । सन्ध्यादीनां सामादीनाञ्च यथावस्थानं मन्त्रशक्तिः ३ ॥ सामर्थ्यमात्रम् । तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थामः ७ शुष्मम् ८ पराक्रमः ९ प्राणः १० । इत्यमरः ॥ शुष्म ११ सहम् १२ । इति शब्दरत्नावली ॥ ऊर्ज्जः १३ । इति जटाधरः ॥ कासूः । सा तु शर्व्वलानामास्त्रम् । इति नानार्थे अमरभरतौ ॥ गौरी । इति मेदिनी ॥ लक्ष्मीः । इति शब्दमाला ॥ * ॥

त्रिशक्तयो यथा,—

"एषा त्रिशक्तिरुद्दिष्टा नयसिद्धान्तगामिनी ।
एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता ॥
एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता ।
एषैव कृष्णा तमसी रौद्री देवी प्रकीर्त्तिता ॥
परमात्मा यथा देवो एक एव त्रिधा स्थितः ।
प्रयोजनवशाच्छक्तिरेकैव त्रिविधाभवत् ॥"
इति वाराहे त्रिशक्तिमाहात्म्यनामाध्यायः ॥*॥

अपि च ।

"बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं
स्मृतम् ।
तयोर्योगे भवेन्नादस्तेभ्यो जातास्त्रिशक्तयः ॥"
इति क्रियासारः ॥

अन्यच्च ।

"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरो-
मिति ॥"
इति गोरक्षसंहिता ॥ * ॥

अष्ट शक्तयो यथा,—

"इन्द्राणी वैष्णवी शान्ता ब्रह्माणी ब्रह्मवादिनी ।
कौमारी नारसिंही च वाराही विकटाकृतिः ॥
माहेश्वरी महामाया भैरवी भीमरूपिणी ।
अष्टौ च शक्तयः सर्व्वा रथस्थाः प्रययुर्मुदा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे बाणयुद्धनाम
११८ अध्यायः ॥ * ॥